श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
ओं नमो भगवते वासुदेवाय

## महर्षि वेदव्यासप्रणीतं श्रीमद्भागवतमहापुराणम्

# ॥ पञ्चमस्कन्धे प्रथमोऽध्यायः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

ओं नमो भगवते वासुदेवाय

# श्रीमद्भागवतमहापुराणम्

## ॥ पञ्चमस्कन्धे प्रथमोऽध्यायः ॥

राजोवाच
प्रियव्रतो भागवत आत्मारामः कथं मुने।
गृहेऽरमत यन्मूलः कर्मबन्धः पराभवः॥ 1 ॥

न नूनं मुक्तसङ्गानां तादृशानां द्विजर्षभ।
गृहेष्वभिनिवेशोऽयं पुंसां भवितुमर्हति॥ 2 ॥

महतां खलु विप्रर्षे उत्तमश्लोकपादयोः।
छायानिर्वृतचित्तानां न कुटुम्बे स्पृहामतिः॥ 3 ॥

संशयोऽयं महान् ब्रह्मन् दारागारसुतादिषु।
सक्तस्य यत्सिद्धिरभूत्कृष्णे च मतिरच्युता॥ 4 ॥

श्रीशुक उवाच
बाढमुक्तं भगवत उत्तमश्लोकस्य श्रीमच्चरणारविन्द -
मकरन्दरस आवेशितचेतसो भागवत परमहंस -
दयितकथां किञ्चिदन्तरायविहतां स्वां शिवतमां
पदवीं न प्रायेण हिन्वन्ति॥ 5 ॥

यर्हि वाव ह राजन् स राजपुत्रः प्रियव्रतः
परमभागवतो नारदस्य चरणोपसेवयाञ्जसावगत -

परमार्थसतत्त्वो ब्रह्मसत्रेण दीक्षिष्यमाणोऽवनि -
तलपरिपालनायाम्नातप्रवरगुणगणैकान्तभाजनतया
स्वपित्रोपामन्त्रितो भगवति वासुदेव एवाव्यवधान -
समाधियोगेन समावेशितसकलकारकक्रियाकलापो
नैवाभ्यनन्दद्यद्यपि तदप्रत्याम्नातव्यं तदधिकरण
आत्मनोऽन्यस्मादसतोऽपि पराभवमन्वीक्षमाणः ॥ **6** ॥

अथ ह भगवानादिदेव एतस्य गुणविसर्गस्य
परिबृंहणानुध्यानव्यवसितसकलजगदभिप्राय
आत्मयोनिरखिलनिगमनिजगणपरिवेष्टितः
स्वभवनादवततार ॥ **7** ॥

स तत्र तत्र गगनतल उडुपतिरिव विमानावलिभि -
रनुपथममरपरिवृढैरभिपूज्यमानः पथि पथि च
वरूथशः सिद्धगन्धर्वसाध्यचारणमुनिगणैरुपगीय -
मानो गन्धमादनद्रोणीमवभासयन्नुपससर्प ॥ **8** ॥

तत्र ह वा एनं देवर्षिर्हंसयानेन पितरं भगवन्तं
हिरण्यगर्भमुपलभमानः सहसैवोत्थायार्हणेन
सह पितापुत्राभ्यामवहिताञ्जलिरुपतस्थे ॥ **9** ॥

भगवानपि भारत तदुपनीतार्हणः सूक्तवाकेनातितरा -
मुदितगुणगणावतारसुजयः प्रियव्रतमादिपुरुषस्तं
सदयहासावलोक इति होवाच ॥ **10** ॥

श्रीभगवानुवाच
निबोध तातेदमृतं ब्रवीमि
मासूयितुं देवमर्हस्यप्रमेयम्।

वयं भवस्ते तत एष महर्षि -
वर्हाम सर्वे विवशा यस्य दिष्टम् ॥ 11 ॥

न तस्य कश्चित्तपसा विद्यया वा
न योगवीर्येण मनीषया वा।
नैवार्थधर्मैः परतः स्वतो वा
कृतं विहन्तुं तनुभृद्भिभूयात् ॥ 12 ॥

भवाय नाशाय च कर्म कर्तुं
शोकाय मोहाय सदा भयाय।
सुखाय दुःखाय च देहयोग -
मव्यक्तदिष्टं जनताङ्ग धत्ते ॥ 13 ॥

यद्वाचि तन्त्यां गुणकर्मदामभिः
सुदुस्तरैर्वत्स वयं सुयोजिताः।
सर्वे वहामो बलिमीश्वराय
प्रोता नसीव द्विपदे चतुष्पदः ॥ 14 ॥

ईशाभिसृष्टं ह्यवरुन्ध्महेऽङ्ग
दुःखं सुखं वा गुणकर्मसङ्गात्।
आस्थाय तत्तद्यदयुङ्क्त नाथ -
श्चक्षुष्मतान्धा इव नीयमानाः ॥ 15 ॥

मुक्तोऽपि तावद्बिभृयात्स्वदेह -
मारब्धमश्नन्नभिमानशून्यः।
यथानुभूतं प्रतियातनिद्रः
किं त्वन्यदेहाय गुणान्न वृङ्क्ते ॥ 16 ॥

भयं प्रमत्तस्य वनेष्वपि स्या -
    द्यतः स आस्ते सहषट्सपत्नः।
जितेन्द्रियस्यात्मरतेर्बुधस्य
    गृहाश्रमः किं नु करोत्यवद्यम्॥ **17**॥

यः षट्सपत्नान् विजिगीषमाणो
    गृहेषु निर्विश्य यतेत पूर्वम्।
अत्येति दुर्गाश्रित ऊर्जितारीन्
    क्षीणेषु कामं विचरेद्विपश्चित्॥ **18**॥

त्वं त्वब्जनाभाङ्घ्रिसरोजकोश -
    दुर्गाश्रितो निर्जितषट्सपत्नः।
भुङ्क्ष्वेह भोगान् पुरुषातिदिष्टान्
    विमुक्तसङ्गः प्रकृतिं भजस्व॥ **19**॥

श्रीशुक उवाच
इति समभिहितो महाभागवतो भगवतस्त्रिभुवन -
गुरोरनुशासनमात्मनो लघुतयावनतशिरोधरो
बाढमिति सबहुमानमुवाह॥ **20**॥

भगवानपि मनुना यथावदुपकल्पितापचितिः
प्रियव्रतनारदयोरविषममभिसमीक्षमाणयोरात्म -
समवस्थानमवाङ्मनसं क्षयमव्यवहृतं
प्रवर्तयन्नगमत्॥ **21**॥

मनुरपि परेणैवं प्रतिसन्धितमनोरथः सुरर्षिवरानु -
मतेनात्मजमखिलधरामण्डलस्थितिगुप्तय आस्थाप्य
स्वयमतिविषमविषयविषजलाशयाशाया उपरराम॥ **22**॥

इति ह वाव स जगतीपतिरीश्वरेच्छयाधिनिवेशित - कर्माधिकारोऽखिलजगद्बन्धध्वंसनपरानुभावस्य भगवत आदिपुरुषस्याङ्घ्रियुगलानवरतध्यानानुभावेन परिरन्धितकषायाशयोऽवदातोऽपि मानवर्धनो महतां महीतलमनुशशास ॥ **23** ॥

अथ च दुहितरं प्रजापतेर्विश्वकर्मण उपयेमे बर्हिष्मतीं नाम तस्यामु ह वाव आत्मजानात्मसमानशीलगुणकर्म - रूपवीर्योदारान् दश भावयाम्बभूव कन्यां च यवीयसी - मूर्जस्वतीं नाम ॥ **24** ॥

आग्नीध्रेध्मजिह्वयज्ञबाहुमहावीरहिरण्य - रेतोघृतपृष्ठसवनमेधातिथिवीतिहोत्रकवय इति सर्व एवाग्निनामानः ॥ **25** ॥

एतेषां कविर्महावीरः सवन इति त्रय आसन्नूर्ध्वरेत - सस्त आत्मविद्यायामर्भभावादारभ्य कृतपरिचयाः पारमहंस्यमेवाश्रममभजन् ॥ **26** ॥

तस्मिन्नु ह वा उपशमशीलाः परमर्षयः सकलजीव - निकायावासस्य भगवतो वासुदेवस्य भीतानां शरणभूतस्य श्रीमच्चरणारविन्दाविरतस्मरणाविगलित - परमभक्तियोगानुभावेन परिभावितान्तर्हृदयाधिगते भगवति सर्वेषां भूतानामात्मभूते प्रत्यगात्मन्येवात्मनस्तादात्म्यमविशेषेण समीयुः ॥ **27** ॥

अन्यस्यामपि जायायां त्रयः पुत्रा आसन्नुत्तमस्तामसो रैवत इति मन्वन्तराधिपतयः ॥ **28** ॥

एवमुपशमायनेषु स्वतनयेष्वथ जगतीपतिर्जगती -
मर्बुदान्येकादशपरिवत्सराणामव्याहताखिलपुरुषकार -
सारसम्भृतदोर्दण्डयुगलापीडितमौर्वीगुणस्तनित -
विरमितधर्मप्रतिपक्षो बर्हिष्मत्याश्चानुदिनमेधमान -
प्रमोदप्रसरणयौषिण्यव्रीडाप्रमुषितहासावलोक -
रुचिरक्ष्वेल्यादिभिः पराभूयमानविवेक इवानवबुध्यमान
इव महामना बुभुजे ॥ **29** ॥

यावदवभासयति सुरगिरिमनुपरिक्रामन् भगवानादित्यो
वसुधातलमर्धेनैव प्रतपत्यर्धेनावच्छादयति तदा हि
भगवदुपासनोपचितातिपुरुषप्रभावस्तदनभिनन्दन्
समजवेन रथेन ज्योतिर्मयेन रजनीमपि दिनं करिष्यामीति
सप्तकृत्वस्तरणिमनुपर्यक्रामद्द्वितीय इव पतङ्गः ॥ **30** ॥

ये वा उ ह तद्रथचरणनेमिकृतपरिखातास्ते
सप्तसिन्धव आसन् यत एव कृताः सप्त भुवो द्वीपाः ॥ **31** ॥

जम्बूप्लक्षशाल्मलिकुशक्रौञ्चशाकपुष्करसंज्ञास्तेषां
परिमाणं पूर्वस्मात्पूर्वस्मादुत्तर उत्तरो यथासङ्ख्यं
द्विगुणमानेन बहिः समन्तत उपक्लृप्ताः ॥ **32** ॥

क्षारोदेक्षुरसोदसुरोदघृतोदक्षीरोददधि -
मण्डोदशुद्धोदाः सप्तजलधयः सप्तद्वीपपरिखा
इवाभ्यन्तरद्वीपसमाना एकैकश्येन यथानुपूर्वं
सप्तस्वपि बहिर्द्वीपेषु पृथक्परित उपकल्पितास्तेषु
जम्ब्वादिषु बर्हिष्मतीपतिरनुव्रता -
नात्मजानाग्नीध्रेध्मजिह्वयज्ञबाहुहिरण्यरेतो -

घृतपृष्ठमेधातिथिवीतिहोत्रसंज्ञान्
यथासङ्ख्येनैकैकस्मिन्नेकमेवाधिपतिं विदधे ॥ 33 ॥

दुहितरं चोर्जस्वतीं नामोशनसे प्रायच्छद्यस्या -
मासीद्देवयानी नाम काव्यसुता ॥ 34 ॥

नैवंविधः पुरुषकार उरुक्रमस्य
पुंसां तदङ्घ्रिरजसा जितषड्गुणानाम्।
चित्रं विदूरविगतः सकृदाददीत
यन्नामधेयमधुना स जहाति बन्धम् ॥ 35 ॥

स एवमपरिमितबलपराक्रम एकदा तु देवर्षिचरणा -
नुशयनानुपतितगुणविसर्गसंसर्गेणानिर्वृत -
मिवात्मानं मन्यमान आत्मनिर्वेद इदमाह ॥ 36 ॥

अहो असाध्वनुष्ठितं यदभिनिवेशितोऽहमिन्द्रियैर -
विद्यारचितविषमविषयान्धकूपे तदलमलममुष्या
वनिताया विनोदमृगं मां धिग्धिगिति
गर्हयाञ्चकार ॥ 37 ॥

परदेवताप्रसादाधिगतात्मप्रत्यवमर्शेनानु -
प्रवृत्तेभ्यः पुत्रेभ्य इमां यथादायं विभज्य
भुक्तभोगां च महिषीं मृतकमिव सह महाविभूतिम -
पहाय स्वयं निहितनिर्वेदो हृदि गृहीतहरि -
विहारानुभावो भगवतो नारदस्य पदवीं
पुनरेवानुससार ॥ 38 ॥

तस्य ह वा एते श्लोकाः -
प्रियव्रतकृतं कर्म को नु कुर्याद्विनेश्वरम्।
यो नेमिनिम्नैरकरोच्छायां घ्नन् सप्तवारिधीन्॥ **39** ॥

भूसंस्थानं कृतं येन सरिद्गिरिवनादिभिः।
सीमा च भूतनिर्वृत्यै द्वीपे द्वीपे विभागशः॥ **40** ॥

भौमं दिव्यं मानुषं च महित्वं कर्मयोगजम्।
यश्चक्रे निरयौपम्यं पुरुषानुजनप्रियः॥ **41** ॥

॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
पञ्चमस्कन्धे प्रियव्रतविजये प्रथमोऽध्यायः॥